# तोटकाष्टकं

विदिताखिल शास्त्र सुधाजलधे महितोपनिषत् कथितार्थनिधे ।
हृदये कलये विमलं चरणं भव शंकर देशिक मे शरणम् ॥ १॥

करुणा वरुणालय पालय मां भवसागर दुःख विदूनहृदम् ।
रचयाखिल दर्शन तत्त्वविदं भव शंकर देशिक मे शरणम् ॥ २॥

भवता जनता सुहिता भविता निजबोध विचारण चारुमते ।
कलयेश्वर जीव विवेकविदं भव शंकर देशिक मे शरणम् ॥ ३॥

भव एव भवानिति मे नितरां समजायत चेतसि कौतुकिता ।
मम वारय मोह महाजलधिं भव शंकर देशिक मे शरणम् ॥ ४॥

सुकृतेऽधिकृते बहुधा भवतो भविता समदर्शन लालसता ।
अतिदीनमिमं परिपालय मां भव शंकर देशिक मे शरणम् ॥ ५॥

जगती मवितुं कलिताकृतयो विचरन्ति महामहसश्छलतः ।
अहिमांशुरिवात्र विभासि गुरो भव शंकर देशिक मे शरणम् ॥ ६॥

गुरुपुंगव पुंगव केतन ते समतामयतां नहि कोऽपि सुधीः ।
शरणागत वत्सल तत्त्वनिधे भव शंकर देशिक मे शरणम् ॥ ७॥

विदिता न मया विशदैक कला न च किंचन काञ्चन मस्ति गुरो ।
द्रुतमेव विधेहि कृपां सहजां भव शंकर देशिक मे शरणम् ॥ ८॥

इति श्रीमत्तोटकाचार्य विरचितं श्रीशङ्करदेशिकाष्टकं सम्पूर्णम् ।